॥ श्रीमते रामानुजाय नमः ॥ श्रीमानखिललोकानां नायकः करुणाक
रः करोतु मंगलं पुंसां कमलानायको हरिः ॥१॥ अथार्थपंचकं निरूप्य
ते ॥ जीवेश्वरोपायफलविरोधिनो ह्यर्थाः तत्र जीवलक्षणं शेषत्वे
सति ज्ञातृत्वं जीवत्वं ते च पंचविधाः नित्यमुक्तकेवलबद्धमुमुक्षु
भेदात् तत्र नित्याः अस्पृष्टसंसाराः अनंतगरुडविष्वक्सेनादयः जा
यमानदशायां भगवत्कटाक्षलब्धाद्वेषाभिमुख्यैः सत्संगसदाचार्योप
देशालब्धसन्मंत्रार्थतत्त्वज्ञाननिर्मुक्तसंसारबंधाः केवलभगवत्कैंक
र्यप्रयोजना मुक्ताः केवलास्तु पूर्वजन्मसुकृतानुसारेण सर्वेश्वरस्य
यथाप्राप्तवर्णाश्रमधर्मानुष्ठाननिर्धूतनिखिलमलान्तःकरणसंजात

१

तत्वज्ञाननिष्ठापराकाष्ठाविनिर्द्धूतसंसाराः केवलाविदेहस्वस्वरूपज्ञाना
नंदानुभवतत्परा मुमुक्षवः भवजनितविदितः विविधनिखिलदुःखानुभ
वोद्भूतनिर्वेदतया सांसारिकैकपारलौकिकैकसुखविमुखाः के
वलकैंकर्यार्थिनः ते च द्विविधा भक्तिनिष्ठाः प्रपत्तिनिष्ठाश्चेति तत्र
भक्तिनिष्ठास्तु भगवत्कृपालब्धनिखिलनिष्कर्मत्यागपूर्वकं स्व ष
शक्त्या कर्मयोगानुष्ठानेन निर्द्धूतनिखिलप्रतिबंधकतया संजातत
त्वज्ञानपरिपाकदशोत्पन्नप्रेम्णा साक्षात्कारपर्यंतेन निर्द्धूतनिखि
लदोषाः प्रारब्धनिखिलकर्मानुभवपर्यंतं विलंब्यमोक्षगामिनः
प्रपन्नाश्च तावन्मात्रविलंबासहाष्काशक्त्या चानन्यरूपतया सत्य
लोकसर्वोपाया भगवदेकोपाया मोक्षगामिनः ते च द्विविधाः ॥ ॥

१

इष्टान्निभेदात् ' तत्र बद्धाः ' प्रारब्धदेहावसानपर्यंतं निरतिशयानंदपरम
भोग्यप्राप्तीच्छोत्सुकतया प्राप्यविरहजनितमहादुःखानभिज्ञाः ऽप्रा
र्तास्तु संजातमिथुनकैंकर्यामृतभोगतीव्रोत्सुकतया तद्विरोधिदे
हसंबंधासहिष्णवः ' बद्धास्तु ऽअनादिकर्मवासनासंपन्ना देवतिर्यङ्
मनुष्यस्थावरात्मकचतुर्विधशरीरकृतात्माभिमानतया तत्तदनुभ
वविषयभावरूपेन परब्रह्मानंदविमुखास्तत्तद्विषयसाधनयज्ञ
दानतपोव्रतानुष्ठानमंत्रोपासनपराः ' ईश्वरतत्त्वं पंचविधं ' परव्यू
हविभवांतर्याम्यर्चाभेदात् ' तत्र परः ' वैकुंठवासी नित्यमुक्तैकभो
ग्यः श्रीभूमिनीलासमेतः ' श्रीमद्दिव्यभूषणदिव्यायुधदिव्यांबरदिव्य
स्रग्गंधलेपनालंकारोपशोभितदिव्यसौंदर्याद्यपरिमितदिव्यमं

गलगुणविशिष्टविग्रहवाननाद्यनंतःस्वतंत्रः' ब्रह्मादीनांप्रकृतिकृत

षाड्गुण्यः' व्यूहस्तु' सृष्टिस्थितिसंहारार्थंज्ञानशक्त्यादिगुणव्यूहत्वेन

व्यूहाः' संकर्षणप्रद्युम्नानिरुद्धाः' विभवस्तु' असद्धर्मबाधितसर्वध

र्मावलोकनार्थंसमः' सत्परित्राणं' सद्धर्मस्थापनार्थं' असद्धर्मनिरासा

र्थंविहितावतारैर्जायमानः' स तु द्विविधः' मुख्यगौणभेदात्' तत्रमु

ख्यादीपादुत्पन्नप्रदीपवत् प्रकृतिसमस्तकल्याणगुणाश्रीकृत

पंचोपनिषन्मयदिव्यमंगलविलक्षणविग्रहविशिष्टाः रामकृष्णादि

रूपाः' गौणाश्चद्विविधाः' शुद्धाशुद्धभेदात्' शुद्धचेतनेष्वाविर्भावाच्छु

द्धाः' बलव्यासादयः' अशुद्धचेतनेष्वाविर्भावादशुद्धाः' शंकरजामद

ग्न्यादयः' विष्वक्‌नियंतान्तर्यामी स तु द्विविधः' अविग्रहसविग्रहभेदात्'

तत्रांशविग्रहस्तु ज्ञानानंदैकस्वरूपी समस्तकल्याणगुणाकरोऽखिलहेय
प्रत्यनीकसमस्तचेतनाचेतनसत्तानिर्वाहको विष्णुनारायणवासुदेवप
रब्रह्मपरमात्मशब्दवाच्यः सर्वव्यापकः सर्वशरीरी तिलतैलवद्दारुवह्नि
वद्दुर्विवेचनीयस्वरूपः॥ सविग्रहस्तु केवलांप्राकृतशंखचक्रादिदिव्या
युधधरः किरीटादिदिव्यभूषणभूषितः समस्तकल्याणगुणोदधिः यः
समस्तहेयप्रतिभटः सर्वशक्तिप्रवर्त्तकः समस्तभोक्ता हृषीकेशः परमपु
रुषोत्तमवासुदेवादिशब्दवाच्योऽवाङ्मयोहार्दः॥ अर्चास्तु अर्चाविग्रहा
वतारो भक्ताधीनसमस्तव्यापारः सर्वज्ञोप्यसर्वज्ञइव चेतनोप्यचेतनइव
स्वतंत्रोपिपरतंत्रइव सर्वशक्तिरप्यशक्तइवावाप्तसमस्तकामोपिसका
मइव स

359

सर्वाद्देकोऽसर्वाद्देक इव स्वाम्यप्यस्वामीव अप्रदृश्योपि सर्वेंद्रियविषयः
सुदुर्लभोपि परमसुलभ इव पुण्यदेश पुण्यस्थान पुण्यतीर्थ पुण्यन
गर पुण्यग्राम पुण्यायतन पुण्यगृह पुण्यक्षेत्रेषु कृतसन्निधानः स च तु
र्विधः स्वयंव्यक्त दिव्य सिद्ध मानुष भेदात् भक्तानुग्रहार्थं स्वयमेवावि
र्भूतं स्वयंव्यक्तं श्रीरंग श्रीमुष्णं श्रीवेंकटशालग्रामनैमिषतोताद्रि
पुष्कर नरनारायणाख्यं दिव्यं देवैः स्थापितं श्रीमदष्टाक्षरादिमहाव्या
पकमंत्रसिद्धाः आमन्नारायणप्राप्तिफल सिद्धाः महर्षयः सिद्धाइत्यु
च्यंते तैः प्रतिष्ठापितं सिद्धं मानुषैः स्थापितं मानुषं

कारणं

तदनंतरं ग्रामेषु गृहेषु पुण्यदेशेषु प्रसिद्धं स्वयंव्यक्तात्समंताद्योजन त्रयं योजनं दिव्यात् अर्द्धयोजनं सैद्धात् मानुषात् क्रोशमात्रं गृहार्चायां गृहमात्रं शालग्रामशिलायां योजनत्रयं परव्यूहश्च पंचोपनिषण्मयाः प्राकृतदिव्यमंगलविग्रहाः विभवाः सांकल्पिकशरीराः आवेशाः पंचभौतिकाः अर्चावतारो दारुलोहशिलामृत्स्नादीनविग्रहाः स्वयंव्यक्तदिव्यविमानान्यप्राकृतान्यचिन्मयानि अन्यत्सर्वं प्राकृतं तथापि सर्वत्रोपादानबुद्धिर्निषिद्धा देवताबुद्धिरेव कर्त्तव्या अन्यथात्मनाशो भवत्येव उपायः पंचविधः कर्मयोग ज्ञानयोग भक्तियोग प्रपत्तियोगाचार्याभिमानयोगभेदात् तत्र कर्मयोगस्तु यज्ञदा

४

362

नतपोव्रतसंध्यावंदनपंचमहायज्ञतीर्थस्नानपुण्यदेशगमननिवा
सकृच्छ्रचांद्रायणव्रतचातुर्मास्यनियमफलमूलाशनप्राणायामासह
माराधनमंत्रजपतर्पणादिकर्मानुष्ठानेनकायशोषणंकृत्वा इंद्रियद्वा
राप्रवर्त्तमानस्यधर्मभूतज्ञानस्यशब्दादीनविषयीकृत्यपरमविषय
सापेक्षत्वमुत्पाद्ययमनियमासनप्राणायामप्रत्याहारध्यानधा
रणसमाधिरूपाष्टांगयोगक्रमेण आत्मनोविषयीकरणं तदेव
ज्ञानयोगस्यसहकारातिऐश्वर्यप्रधानसाधनं ज्ञानयोगस्तुकर्म
योगजनितात्मज्ञानजनितस्वात्मप्रतिसंबंधिज्ञानस्यहृदयकम
लारित्वमंगुलबोमादिपुरुषेंद्रत्रिधामवासुदेवविष्णुनारायण

४

सर्वेश्वरं शंखचक्रादिदिव्यायुधधरं पीतांबरालंकृतं किरीटादिदिव्य
भूषणाभूषितं विलक्षणविग्रहं विषयीकृत्यानुभूयानुभूया
नुभवयोगाभ्यासबलेनानुभवकालं वर्द्धयित्वानुभवनैरंतर्यापा
दानं तदेतद्भक्तियोगस्य सहकरोति केवलस्य मोक्षस्य प्रधानसाधनं॥
भक्तियोगस्तु॥ तैलधारावदविच्छिन्नस्मृतिसंतानरूपतामापाद्यप्रा
रब्धकर्मावसानपर्यंतं पुनरनुभवप्रकर्षेण साक्षात्काररवत्वोपादा
ने प्रपत्तियोगस्तु एवंविधज्ञानसहकृतभक्तियोगाशक्तस्य प्राप्तिम
नेक्षस्तुकारः शीघ्रफलदः सकृदेव हि शास्त्रार्थ इत्युपायानुष्ठानस्य
सकृत्त्वादनुष्ठानानंतरमाविभगवद्विषयाणां सर्वेषां प्राप्यकोटिघटि

५

तत्वात्स्वरूपानुरूपस्याध्यवसायविशेषः सच द्विविधः आर्त्तप्रप
त्तियोगः दृप्तप्रपत्तियोगश्चेति आद्यस्तु यादृच्छिकभगवत्कटाक्षस
मनंतरसदाचार्योपदेशमूलसच्छास्त्राभ्याससमासादितयथार्थज्ञा
नसमनंतरमानंदरूपभगवदनुभवविरोधिदेहसंबंधस्य दुस्सहत
याभगवदनुभवैकांत्यंतिकानुकूलरूपदेहदेशादिप्राप्तिवांछा
दिनात्यंततत्परतयातावद्भगवदनुसंधानेनतत्परत्वोत्पादनविशे
षः तदुक्तं अभियुक्तैः नदेहं नप्राणान्नचसुखमशेषाभिलषितं नचा
त्मानंनान्यत्किमपितवशेषत्वविभवात् बहिर्भूतं नाथक्षणमपि
सहे यातु शतधा विनाशं तत्सत्यं मधुमथन विज्ञापनमिदं नन्वप्रप
न्नस्स त्वदेवनाथ त्वं वाहमस्मीतिच याचमानः तेवानुकंप्यः स्मर्तः

प्रतिज्ञां मदेकवर्ज्जं किमिदं व्रतं ते इत्यत्र प्रतियोगस्तु उपचयापचय
यदेहांतरप्राप्त्यादिषु तद्योगभूतसुखदुःखेगर्भवासेषु स्वर्गनरका
दिषु च विरक्तो भीतश्च भूत्वा तन्निवृत्त्यर्थं भगवत्प्राप्त्यर्थं च सदा
चार्योपदेशाद्याप्नतया हेयोपादेयतया विपरीतवृत्ति विनिवृत्तः वि
हितवर्णाश्रमानुष्ठानं च भगवत्कैंकर्यं कायिकं वाचिकं मानसि
कं च यथाशक्ति चानुतिष्ठन् परमात्मनः स्वस्य च शेषशेषि संबंधं
भार्या पितृपुत्र संबंधं [illegible] संबंधं नियंतृनियम्य संबंधं शरीर
शरीरि संबंधं धर्मिधर्मभावसंबंधं धारकधार्यभावसंबंधं रक्ष्य
रक्षकसंबंधं ज्ञातृज्ञेयभावसंबंधं चानुसंधाय तस्य च सर्वज्ञाना

मात्मनश्चाकिंचनत्वं चानुसंधाय स्वोपेयनिमित्तं सर्वमात्मीयं भ
गवत्येवारोप्य निर्भरतया विनिवृत्तस्वप्रयत्नो भूत्वावस्थानं स्वा
चार्याभिमानयोगस्तु । उक्तोपायेष्वशक्तस्य तदर्थं केवलयैव कृ
पया परियास्वपुरुषस्यानर्थहानिमर्थप्राप्तिं च तत्प्राप्तिकारणं
वारणं च भगवत्प्रीतिं परमसमृद्धिपादत्वोपपादकतया स्वरूप
लाभं चानुसंधाय व्याधिग्रस्तस्तनंधयेन पयति स्वात्महानि
तद्रोगनिवर्तकौषधं सेवमानमातेव तदर्थं स्वयमेवानुष्ठानं
कुर्वंतं परमदयालुं महात्मानमाश्रित्य तत्साक्षात्कृतगृहदैव
कलत्रापत्यधनशरीरः सन् तदधीनप्रवृत्तिनिवृत्तिर्भूत्वावस्था

नं यथेश्वरोपायो नित्यसिद्धप्राप्यस्वरूपः सन्नेव सर्वदेवतांतर्यामितया

प्राप्यभूतः तथाचार्योपि स्वयमुपायः सन्नेव सर्वेषामुपायानां सह

करोति पुरुषैरर्थ्याः पुरुषार्थाः यद्वा पुरुषस्य एवार्थः पुरुषार्थ इति

स्वात्मजनितप्रीतिरित्यर्थः तदर्थं तया धर्मार्थकामाः पुरुषार्था इ

त्युच्यंते ते च पंचविधाः धर्मार्थकामकैवल्यभगवत्प्राप्तिभेदात्

तत्र धर्मो नाम प्राणिपरित्राणहेतुभूतप्रवृत्तिविशेषः एतदंगमे

वान्यदखिलं तथा धर्मः प्राणिपरित्राणं तदेव मुख्यं तदुपातकं सर्वा

णि धर्मकर्माणि एतच्छेषाणि वै जगुः एकतः क्रतवः सर्वे समग्रवर

दक्षिणाः एकतः [illegible] भयभीतस्य प्राणिनः प्राणरक्षणं अर्थपुरु

प्रार्थ्यक्तः स्ववर्णाश्रमकर्मेण धनधान्यादिकं संपाद्य संरक्ष्य संवर्ध्य देश
कालपात्रपितृदैवकैंकर्यसत्संधावनाउरुदक्षिणापारितोषिकत्यागभो
गादिकृते विनियुज्य तज्जनितसुखदुःखानुभवविशेषः कामस्तु स्त्री
विषयकः शास्त्राविनिषिद्धो भोगः कैवल्यं तु जरामरणमोहापेत्या सुकृत्व
कारेणप्रकृतिविमुक्तस्वात्ममात्रानुभवः परमपुरुषार्थस्तल हेला भगव
त्प्रीतिस्तु प्रारब्धं सुखदुःखानुभवविनाश्यतयानुभाव्यपुण्यपापावसा
नेऽस्ति जायते परिणमते विवर्द्धतेऽपक्षीयते विनश्यतीति षड्भाव
विकाररहिताध्यात्मिकाधिभौतिकाधिदैविकाख्यतापत्रयास्पदभग
वत्स्वरूपतिरोधायकविपरीतज्ञानजनकसंसारहेतुभूतनरकस्वर्गभो
गभोग्यान्यतमनिदानभूतं स्थूलदेहं हेयतयापरित्यज्य सुषुम्णयाशिरः

कपालं भित्वोत्क्रम्य केवल सूक्ष्मशरीरेणार्चिरादिमार्गप्रवृत्त्या सूर्यमंडलं
भित्वा प्रकृतिमुत्तीर्य विरजायां स्नात्वा सूक्ष्मशरीरं वासनारेणुं चावधूय
विरजो भूत्वा संकल्पादेव विरजामुत्तीर्य ॥ अमानवकरस्पर्शान्नष्टगुणस
त्वगुणविलक्षणाप्राकृतशुद्धसत्वद्रव्यात्मकं पंचोपनिषण्मयज्ञानानंदप्रका
शकं भगवत्स्वरूपगुणविभूतिप्रकाशकं निरवधिकतेजोरूपं विग्रहं प्र
त्वा ॥ अमानवदर्शितपंथाः स्ततलवनमासाद्य तत्र च ऐरंमदीयपारव्य दिव्यामृ
तसरसि स्नात्वा सोमसवाख्य दिव्याश्वत्थमूलं दिव्यमाणिक्यवेदिका
यां पंचशतैर्दिव्याप्सरोगणैः कृतब्राह्मालंकारः स्तदनु भवजनितब्र
ह्मत्वकर्षः संजाततत्पराधिक्यात् भगवत्प्रेषितस्वांतरंगपरिकरानान
जनितगमनजवोत्सवाकुलः तद्दर्शितमार्गश्च दर्शनकुतूहलात्मिहु

प

तस्तत्सत्कारसमाजनितप्रतिक्षणमुद्वेल्लानंदविशेषः ॥ अतीतदिव्यजनप
दविशेषदर्शनकुतूहलादागतनागरिकाभिद्रुतस्तत्सत्कार ॥ विशेष
परवशो वैकुंठनगरद्वारि कृतप्रणामः प्रविश्य नगरे राजमार्गमाविश्य
तत्र दने काञ्चनसाक्रोत्कारप्रीतितरंगसंपातदोल्लायमानमानसः कै
कुंठे क्रमेण दिव्यभवनप्राकारद्वारगोपुराणि संगम्य प्रणम्य द्वारपालैः
प्रणम्यतस्तत्कृतः प्रविश्य दिव्यरत्नमयसहस्रस्थूलमंडपरत्नमाणिक्य
सोपानमार्गेणारूढ्य ॥ प्रचमक्तः विष्वक्सेषां सहितं स्वंसं विष्वक्सेनोत्सुकं भगवंतं
नारायणं श्रीभूलीलासमेतं दिव्यरूपं शंखचक्रगदादिधरं किरीटादि
दिव्याभरणविभूषितं पीतांबरधरं दिव्यगंध दिव्यमाल्यालंकृतं सर्व
गंधं सर्वरसं सर्वस्पर्शं सर्वप्रदं वाच्यं सर्वस्वामिनं नित्यमुक्तैकभोग्य
मात्मप्रवरमनुभूयानुभवजनितप्रीतिकारितकैंकर्याभिनिवेशापरि

गृहीतानेकविग्रहविशिष्यमान सर्वदेश सर्वकाल सर्वावस्थोचितकैंक
र्यातिशयजनितप्रीत्यतिशयवत्त्वं । विरोधीतु । विशेषेणोपादेयं रूणद्धी
ति विरोधी । स तु पंचविधः स्वस्वरूपविरोधी उपायस्वरूपविरोधी पुरु
षार्थस्वरूपविरोधी प्राप्तिस्वरूपविरोधी चेति तत्र स्वस्वरूपविरोधी
अनात्मन्यात्मबुद्धिः स्वान्यशेषबुद्धिः स्वातंत्र्यबुद्धिः परस्वरूपविरोधी
तु देवतांतरे परत्वबुद्धिस्लइरुकत्वबुद्धिस्तदपवरत्व बुद्धिः साम्यबु
द्धिर्भगवद्देवतारेषु मनुष्यत्वादिबुद्धिः अर्चावतारेषु उपादानबुद्धिः
अशक्तत्वबुद्धिरस्वामित्वबुद्धिः स्वातु[illegible]बुद्धिः परत्वे[illegible] स्व[illegible] बुद्धिर
ती[illegible]पात्वबुद्धिश्च साधनविरोधी तु साधनांतरगौरवप्रतिपत्तिः उपे
यगौरवोपायलाघवप्रतिपत्तिः स्वदोषवाहुल्यप्रतिपत्तिश्च पुरुषार्थवि

रोधीन्तु पुरुषार्थांतराभिनिवेशः स्वेच्छारूपानुगुण्येन स्वातंत्र्यात्स्वार्थतया
कैंकर्यप्रतिपत्तिश्च प्राप्ति विरोधीन्तु प्रारब्धदेहसंबंधस्तत्संबंधिदेहस्थान्तु
तापकस्त्व भगवदपचार भागवतापचारासह्यापचाराश्चेतरापचाराद्यं स्व
रूपोपायोपेयस्वरूपविरोधीन्तु अन्नदोषो ज्ञानविरोधी सहवासदोषो
भोगविरोधी एवं सजातीयपंचकज्ञानस्य मुमुक्षोः कालक्षेपा युः कैंक
र्यतया भगवत्प्रयोजनतया च अवश्यकर्तव्यं संसारपातनिवारभूतं व
र्णाश्रमोचितवैष्णवत्वोचितं अशेषधर्मानुष्ठानं निषिद्धकर्मवर्जनं वि
हितकर्मेणान्नपानादिसंपादनं संपादितद्रव्येषु स्वत्वनिवृत्तिपूर्वकं भगवत
स्वत्वानुसंधानं तत्तद्भगवदाज्ञाकैंकर्योचितार्थे विनियोगं विशेषतः स्वाचा
र्य भागवत भगवद्विग्रहहेतुवचनभूषणधारणपोषणभोजविवादिकृत्ये
षु भगवन्मंदिरनिर्माणोद्धारदिव्यविमानोद्यानदिव्यग्राममंडपदिव्यप्राकार

चंदनकुसुमतांबूलादिसकलभोगसंपादनादिषु विद्यमानार्थप्रतिपा
द्यविद्यमानपुत्रमित्रकलत्रक्षेत्रधनधान्यपशाद्यादिषु ममताबुद्धिं त्याग
पूर्वकं स्वाभाविकतदीयत्वमनुसंधाय वैष्णवानुगतो भूत्वा ॥ वैष्णवा
न् सन्मार्गनिरतान् परित्यज्यासन्मार्गवर्ती भूत्वा पंचकालपरस्त्वा ॥ अभि
गमनोपादानेज्यास्वाध्याययोगाख्येषु पंचकालेष्वाप्रसीदप्रतिपत्त्या
चमुक्का स्वाचार्यभागवतभगवत्कैंकर्यमिनिविष्टस्तत्सन्निधौ निरं
तरवासकुतूहलः स्वाचार्यसन्निधावज्ञातेइव भागवतसन्निधौ पारत
च्यं भगवत्सन्निधौ स्वदोषानुसंधानं स्वाचार्यस्य सर्वज्ञतां भागवतपारत्व
भगवत्कल्याणगुणाश्चानुसंधायासत्संव्याघ्रविषसर्पादिष्विवातिभीतः
सर्वप्रकारेणातत्त्वहेषु संसारिषु स्वस्यैवादिमतां व्यावृत्तिं चानुसंधाय

०१०

प्राप्यप्रापकदृढाध्यवसायजनितनिर्भरत्वमुखितत्यक्तदेहः स्वस्पृहासंपा
दितनितांतरानुसंधेयपरत्वारूढगुणशालित्वप्रामशीलत्वकैर्भूत्वाप्राप्यदेहा
वसानपर्यंतमेवमनुष्ठानं कुर्वन् पूर्वोक्तरीत्योत्क्रम्यार्चिरादिगत्यावाह
दिपुरुषसंकल्पप्राप्तवैदात्म्यविहगेश्वरवाहनेन भगवता सह भगवत्प्र
रातिशयसंपन्नरूपाईकालभगवत्प्राप्तिसंपादकभगवन्मार्गेणवाप्राप्या
नुकूलदेहसंबंधसंहारकभगवदनुभवजनितप्रीतिकारितकैंकर्यैश्व
र्यं समाप्नोति॥ इतिपरमहंसपरिव्राजकाचार्यश्रीन्नारायणयतीश्वरकृ
तावर्थपंचकप्रकरणं समाप्त॥